শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে

# ॥ চৎৱারিংশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ চৎৱারিংশঃ সর্গঃ ॥

**সগরপুত্রাণাং ভাৱিনং ৱিনাশং সূচযিৎৱা ব্রহ্মণা দেৱানাং শমনং ভুৱং খনতাং সগরাত্মজানাং কপিলপার্শ্ৱে গমনং তস্য রোষাগ্নিনা তেষাং ভস্মীভাৱশ্চ**

দেৱতানাং ৱচঃ শ্রুৎৱা ভগৱান্ ৱৈ পিতামহঃ।
প্রত্যুৱাচ সুসন্ত্রস্তান্ কৃতান্তবলমোহিতান্॥ **1.40.1** ॥

যস্যেযং ৱসুধা কৃৎস্না ৱাসুদেৱস্য ধীমতঃ।
মহিষী মাধৱস্যৈষা স এৱ ভগৱান্ প্রভুঃ॥ **1.40.2** ॥

কাপিলং রূপমাস্থায ধারযত্যনিশং ধরাম্।
তস্য কোপাগ্নিনা দগ্ধা ভৱিষ্যন্তি নৃপাত্মজাঃ॥ **1.40.3** ॥

পৃথিৱ্যাশ্চাপি নির্ভেদো দৃষ্ট এৱ সনাতনঃ।
সগরস্য চ পুত্রাণাং ৱিনাশো দীর্ঘদর্শিনাম্॥ **1.40.4** ॥

পিতামহৱচঃ শ্রুৎৱা ত্রযস্ত্রিংশদরিন্দমাঃ।
দেৱাঃ পরমসংহৃষ্টাঃ পুনর্জগ্মুর্যথাগতম্॥ **1.40.5** ॥

সগরস্য চ পুত্রাণাং প্রাদুরাসীন্মহাস্বনঃ।
পৃথিৱ্যাং ভিদ্যমানাযাং নির্ঘাতসমনিঃস্বনঃ॥ **1.40.6** ॥

ততো ভিত্ত্বা মহীং সর্ৱাং কৃৎৱা চাপি প্রদক্ষিণম্।
সহিতাঃ সাগরাঃ সর্ৱে পিতরং ৱাক্যমব্রুৱন্॥ **1.40.7** ॥

পরিক্রান্তা মহী সর্ৱা সত্ত্ৱৱন্তশ্চ সূদিতাঃ।
দেৱদানৱরক্ষাংসি পিশাচোরগপন্নগাঃ ॥ **1.40.8** ॥

ন চ পশ্যামহেঽশ্ৱং তে অশ্ৱহর্তারমেৱ চ।
কিং করিষ্যাম ভদ্রং তে বুদ্ধিরত্র ৱিচার্যতাম্ ॥ **1.40.9** ॥

তেষাং তদ্ ৱচনং শ্রুৎৱা পুত্রাণাং রাজসত্তমঃ।
সমন্যুরব্রৱীদ্ ৱাক্যং সগরো রঘুনন্দন ॥ **1.40.10** ॥

ভূযঃ খনত ভদ্রং ৱো ৱিভেদ্য ৱসুধাতলম্।
অশ্ৱহর্তারমাসাদ্য কৃতার্থাশ্চ নিৱর্তত ॥ **1.40.11** ॥

পিতুর্ৱচনমাসাদ্য সগরস্য মহাত্মনঃ।
ষষ্টিঃ পুত্রসহস্রাণি রসাতলমভিদ্রৱন্ ॥ **1.40.12** ॥

খন্যমানে ততস্তস্মিন্ দদৃশুঃ পর্ৱতোপমম্।
দিশাগজং ৱিরূপাক্ষং ধারযন্তং মহীতলম্ ॥ **1.40.13** ॥

সপর্ৱতৱনাং কৃৎস্নাং পৃথিৱীং রঘুনন্দন।
ধারযামাস শিরসা ৱিরূপাক্ষো মহাগজঃ ॥ **1.40.14** ॥

যদা পর্ৱণি কাকুৎস্থ ৱিশ্রমার্থং মহাগজঃ।
খেদাচ্চালযতে শীর্ষং ভূমিকম্পস্তদা ভৱেৎ ॥ **1.40.15** ॥

তে তং প্রদক্ষিণং কৃৎৱা দিশাপালং মহাগজম্।
মানযন্তো হি তে রাম জগ্মুর্ভিত্ত্ৱা রসাতলম্ ॥ **1.40.16** ॥

ততঃ পূর্ৱাং দিশং ভিত্ত্ৱা দক্ষিণাং বিভিদুঃ পুনঃ।
দক্ষিণস্যামপি দিশি দদৃশুস্তে মহাগজম্ ॥ **1.40.17** ॥

মহাপদ্মং মহাত্মানং সুমহৎপর্ৱতোপমম্।
শিরসা ধারযন্তং গাং ৱিস্মযং জগ্মুরুত্তমম্ ॥ **1.40.18** ॥

তে তং প্রদক্ষিণং কৃৎৱা সগরস্য মহাত্মনঃ।
ষষ্টিঃ পুত্রসহস্রাণি পশ্চিমাং বিভিদুর্দিশম্॥ **1.40.19**॥

পশ্চিমাযামপি দিশি মহান্তমচলোপমম্।
দিশাগজং সৌমনসং দদৃশুস্তে মহাবলাঃ॥ **1.40.20**॥

তে তং প্রদক্ষিণং কৃৎৱা পৃষ্টৱা চাপি নিরামযম্।
খনন্তঃ সমুপাক্রান্তা দিশং সোমৱতীং তদা॥ **1.40.21**॥

উত্তরস্যাং রঘুশ্রেষ্ঠ দদৃশুর্হিমপাণ্ডুরম্।
ভদ্রং ভদ্রেণ ৱপুষা ধারযন্তং মহীমিমাম্॥ **1.40.22**॥

সমালভ্য ততঃ সর্ৱে কৃৎৱা চৈনং প্রদক্ষিণম্।
ষষ্টিঃ পুত্রসহস্রাণি বিভিদুর্ৱসুধাতলম্॥ **1.40.23**॥

ততঃ প্রাগুত্তরাং গৎৱা সাগরাঃ প্রথিতাং দিশম্।
রোষাদভ্যখনন্ সর্ৱে পৃথিৱীং সগরাত্মজাঃ॥ **1.40.24**॥

তে তু সর্ৱে মহাত্মানো ভীমৱেগা মহাবলাঃ।
দদৃশুঃ কপিলং তত্র ৱাসুদেৱং সনাতনম্॥ **1.40.25**॥

হযং চ তস্য দেৱস্য চরন্তমৱিদূরতঃ।
প্রহর্ষমতুলং প্রাপ্তাঃ সর্ৱে তে রঘুনন্দন॥ **1.40.26**॥

তে তং যজ্ঞহনং জ্ঞাৎৱা ক্রোধপর্যাকুলেক্ষণাঃ।
খনিত্রলাঙ্গলধরা নানাৱৃক্ষশিলাধরাঃ॥ **1.40.27**॥

অভ্যধাৱন্ত সঙ্ক্রুদ্ধাস্তিষ্ঠ তিষ্ঠেতি চাব্রুৱন্।
অস্মাকং ৎৱং হি তুরগং যজ্ঞিযং হৃতৱানসি॥ **1.40.28**॥

দুর্মেধস্ত্ৱং হি সম্প্রাপ্তান্ ৱিদ্ধি নঃ সগরাত্মজান্।
শ্রুৎৱা তদ্ ৱচনং তেষাং কপিলো রঘুনন্দন॥ **1.40.29**॥

রোষেণ মহতাৱিষ্টো হুঙ্কারমকরোৎ তদা।
ততস্তেনাপ্রমেযেণ কপিলেন মহাত্মনা।
ভস্মরাশীকৃতাঃ সর্ৱে কাকুৎস্থ সগরাত্মজাঃ॥ **1.40.30** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে চত্ৱারিংশঃ সর্গঃ ॥